विद्याया विफलतां करोमि ।' ततस्तेनाभिहितम्–'तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि ।' तथानुष्ठिते यावत्सजीवः कृतस्तावत्ते त्रयोऽपि सिंहेनोत्थाय व्यापादिताः। स च पुनर्वृक्षादवतीर्य गृहे गतः । अतोऽहं ब्रवीमि–'वरं बुद्धिर्न सा विद्या' इति । अतः परमुक्तं च सुवर्णसिद्धिना—

'अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः ।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः' ॥ ३९ ॥

चक्रधर आह–कथमेतत् ? । सोऽब्रवीत्—

## ४ मूर्खपण्डितचतुष्टयकथा

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणाः परस्परं मित्रत्वमापन्नाः वसन्ति स्म । बालभावे तेषां मतिरजायत–'भोः ! देशान्तरं गत्वा विद्याया उपार्जनं क्रियते'–इति । अथाऽन्यस्मिन्दिवसे ब्राह्मणाः परस्परं निश्चयं कृत्वा विद्योपार्जनार्थं कान्यकुब्जे गताः । तत्र च विद्यामठे गत्वा पठन्ति । एवं द्वादशाब्दान् यावदेकचित्ततया पठित्वा विद्याकुशलास्ते सर्वे संजाता । ततस्तैश्चतुर्भिर्मिलित्वोक्तम्–'वयं सर्वविद्यापारङ्गताः, तदुपाध्यायमुत्कलापयित्वा स्वदेशे गच्छामः ।' एवं मन्त्रयित्वा ( तथैवानुष्ठीयतामित्युक्त्वा ) ब्राह्मणा उपाध्यायमुत्कलापयित्वा, अनुज्ञां[१] लब्ध्वा, पुस्तकानि नीत्वा प्रचलिता यावत्किञ्चिन्मार्गं यान्ति

---

व्यापादयिष्यति=मारयिष्यति । सः=तृतीयो विप्रपुत्रः । विफलतां=इदानीं स्मृताया विद्याया वृथा परावर्त्तनं । तेन=सुबुद्धिना । क्षणं=क्षणमात्रम् । प्रतीक्षस्व=परिपालय । ( ठहर जाओ ) ।

वरं=श्रेष्ठा । लोकाचारविवर्जिताः=व्यवहारबुद्धिशून्या. ॥ ३९ ॥

मित्रत्व=मैत्रीम् । आपन्नाः=प्राप्ताः । बाल्यभावे–बाल्यावस्थायामेव । कान्यकुब्जे=देशभेदे । ( कन्नौज ) । विद्यामठे=पाठशालायाम् । एकचित्ततया=तन्मयतया । उत्कलापयित्वा=पृष्ट्वा । धनादिदानेन सन्तोष्य वा । प्राकृत-

---

१ 'अनुज्ञाप्य' इति संस्कृत. पाठः ।

तावद्द्वौ पन्थानौ समायातौ दृष्ट्वा उपविष्टाः सर्वे ।

तत्रैकः प्रोवाच-'केन मार्गेण गच्छामः ? ।' एतस्मिन्समये तस्मिन् पत्तने कश्चिद्वणिक्पुत्रो मृतः। तस्य दाहाय महाजनो गतोऽभूत् । ततश्चतुर्णां मध्यादेकेन पुस्तकमवलोकितम्—

महाजनो येन गतः स पन्थाः-इति ।

—तन्महाजनमार्गेण गच्छामः ।' अथ ते पण्डिता यावन्महाजनमेलापकेन सह यान्ति तावद्रासभः कश्चित्तत्र श्मशाने दृष्टः । अथ द्वितीयेन पुस्तकमुद्घाट्यावलोकितम्—

'उत्सवे व्यसने प्राप्ते दुर्भिक्षे शत्रुसङ्कटे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ४० ॥

तदहो ! अयमस्मदीयो बान्धवः ।' ततः कश्चित्तस्य ग्रीवायां लगति, कोऽपि पादौ प्रक्षालयति । अथ यावत्ते पण्डिताः दिशामवलोकनं कुर्वन्ति,तावत्कश्चिदुष्ट्रो दृष्टः । तैश्चोक्तम्-एतत्किम् ? । तावत्तृतीयेन पुस्तकमुद्घाट्योक्तम्-

धर्मस्य त्वरिता गतिः ।

तन्नूनमेष धर्मस्तावत् ।' चतुर्थेनोक्तम्—

'इष्टं धर्मेण योजयेत् ।'

---

प्रसिद्धोऽयं प्रयोग । अनुज्ञाम्=आज्ञा । लब्ध्वा=गृहीत्वा । द्वौ पन्थानौ=मार्गो द्विधा विभक्त ।

पत्तने=नगरे । महाजन'=वणिग्जनसमूह , श्रेष्ठो जनश्च। येन=येन मार्गेण । गतः=व्यवहारं करोति, कृतवान् वा, प्रचलितश्च । पन्था'=स मार्ग -श्रेष्ठ । महाजनमेलापकेन=वणिग्जनसमूहेन ।

उत्सवे=हर्षसमये । व्यसने=विपत्तिकाले। शत्रुसङ्कटे=शत्रुकृते कष्टे । राजद्वारे=राजभवने ('कचहरी') । यो विपदि उत्सवे च वर्त्तते स एव वान्धव इत्यर्थ ॥४०॥

अयं=रासभः । तस्य=रासभस्य । लगति=परिष्वजते । दिशा=हरिताम् । इतस्तत इति यावत् । त्वरिता=चपला, अचिन्तनीया, सूक्ष्मा च । एष =धावमान उष्ट्र । इष्टं=स्वप्रियं । रासभश्च वन्धुतया इष्टकोटिप्रविष्ट इति उष्ट्रग्रीवाया

तद्वान्धवोऽयमस्माकं धर्मेण नियुज्यताम् ।

अथ तैश्च रासभ उष्ट्रग्रीवायां बद्धः । तत्तु केनचित्तत्स्वामिनो रजकस्याग्रे कथितम् । श्रुत्वा च यावद्रजकस्तेषां मूर्खपण्डितानां प्रहारकरणाय समायातस्तावत्ते प्रनष्टाः ।

ततो यावदग्रे किञ्चित्स्तोकं मार्गं यान्ति, तावत्काचिन्नदी समासादिता । तस्या जलमध्ये पलाशपत्रमायान्तं दृष्ट्वा पण्डितेनैकेनोक्तम्—

'आगमिष्यति यत्पत्रं तदस्मांस्तारयिष्यति ।'

एतत्कथयित्वा तत्पत्रस्योपरि पतितो यावन्नद्या नीयते, तावत्तं नीयमानमवलोक्याऽन्येन पण्डितेन केशान्तं गृहीत्वोक्तम्–

'सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः ।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः' ॥ ४१ ॥

–इत्युक्त्वा तस्य शिरश्छेदो विहितः । अथ तैश्च पश्चाद्गत्वा कश्चिद्ग्राम आसादितः । तेऽपि ग्रामीणैर्निमन्त्रिताः पृथक्पृथग्गृहेषु नीताः । तत एकस्य सूत्रिका घृतखण्डसंयुक्ता भोजने दत्ता । ततो विचिन्त्य पण्डितेनोक्तम्–यत्—

दीर्घसूत्रो[1] विनश्यति ।

–एवमुक्त्वा भोजनं परित्यज्य गतः ।

---

रासभवन्धनम् । रजकस्य=गर्दभस्वामिनो वस्त्रक्षालकस्य । प्रनष्टाः=पलायिताः । समासादिता=प्राप्ता । पत्रं=वाहनं नौकादिकं, पर्णञ्च । 'पत्रन्तु वाहने पर्णे' इति विश्वः । नद्या नीयते=नद्या निमज्जति, प्रवहति वा । केशान्तं=केशाग्रभागं । तैः=अवशिष्टैस्त्रिभिः । निमन्त्रिताः=भोजनायाहूताः । सूत्रिका='सेमई' इत्याख्याता, 'जलेबी'त्याख्याता वा । दीर्घसूत्रः=आलस्योपहतः । 'दीर्घसूत्रश्चिरक्रियः' इति कोशात् । सूत्रिकायामपि दीर्घाः समितातन्तव इति तयोः साम्यं । मण्डकाः=करपट्टिकाः, फुल्का वा । ( 'रोटी, फुलका' ) । अतिविस्तारविस्तीर्णम् अतिवर्द्धितं वस्तु न चिरस्थायि, अथवा यथा 'नानाविधव्यापारप्रसक्तो नरश्चि-

---

१ 'दीर्घसूत्री'ति पाठान्तरम् ।

तथा द्वितीयस्य मण्डका दत्ताः । तेनाप्युक्तम्—

'अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषम्[1] ।'

स च भोजनं त्यक्त्वा गतः । अथ तृतीयस्य वटिकाभोजनं दत्तम् । तत्रापि तेन पण्डितेनोक्तम्—

'छिद्रेष्वनर्था बहुलीभवन्ति' ।

एवं ते त्रयोऽपि पण्डिताः क्षुत्क्षामकण्ठा लोकैर्हस्यमानास्ततः स्थानात् स्वदेशं गताः ।' ❀

अथ सुवर्णसिद्धिराह—'यत्त्वं लोकव्यवहारमजानन्मया वार्यमाणोऽपि न स्थितः, तत ईदृशीमवस्थामुपगतः । अतोऽहं ब्रवीमि—'अपि शास्त्रेषु कुशलाः' इति ॥

तच्छ्रुत्वा चक्रधर आह—'अहो, अकारणमेतत्—

सुबुद्धयोऽपि नश्यन्ति दुष्टदैवेन नाशिताः ।
स्वल्पधीरपि तस्मिंस्तु कुले नन्दति सन्ततम् ॥ ४२ ॥

उक्तञ्च—

अरक्षितं तिष्ठति दैवरक्षितं, सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे न जीवति ॥४३॥

तथाच—

शतबुद्धिः शिरस्थोयं लम्बते च सहस्रधीः ।
एकबुद्धिरहं भद्रे ! क्रीडामि विमले जले ॥ ४४ ॥

सुवर्णसिद्धिराह—'कथमेतत् ?' । स आह—

## ५ शतबुद्ध्यादिमत्स्यत्रयकथा

कस्मिंश्चिज्जलाशये शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ निव-

---

न्ताशताकुलो न चिरं जीवति, एवम् 'अतिविस्तीर्णा मण्डका न भोजने प्रशस्ता.' इत्यप्यर्थ. । वटिका=('वडा' ।) छिद्रेषु=व्यसनेषु, सच्छिद्रेषु भोजनेषु च । बहुलीभवन्ति=वर्द्धन्ते । क्षुत्क्षामकण्ठाः=क्षुधाशुष्ककण्ठा. । बुभुक्षिता. ।

न स्थित.=न गमनान्निवृत्तः । अरक्षितम्=अकृतरक्षणप्रयत्न । दैव=भाग्यम् ॥ ४३ ॥ भद्रे=सुभगे ॥ ४४ ॥ जलाशये=सरसि । तयो.=शतबुद्धि—

---

१ 'चिरायुषे' इति गौडा. पठन्ति ।